✧˖·┈°*❋ ❋*°┈·˖✧

# शिव मंगलाष्टकम्
# (Shiv Mangalashtakam)

✧˖·┈°*❋ ❋*°┈·˖✧

# शिव मंगलाष्टकम्

भवाय चंद्रचूडाय निर्गुणाय गुणात्मने ।
कालकालाय रुद्राय नीलग्रीवाय मंगलम् ॥ 1 ॥

वृषारूढाय भीमाय व्याघ्रचर्मांबराय च ।
पशूनांपतये तुभ्यं गौरीकांताय मंगलम् ॥ 2 ॥

भस्मोद्धूलितदेहाय नागयज्ञोपवीतिने ।
रुद्राक्षमालाभूषाय व्योमकेशाय मंगलम् ॥ 3 ॥

सूर्यचंद्राग्निनेत्राय नमः कैलासवासिने ।
सच्चिदानंदरूपाय प्रमथेशाय मंगलम् ॥ 4 ॥

मृत्युंजयाय सांबाय सृष्टिस्थित्यंतकारिणे ।
त्रयंबकाय शांताय त्रिलोकेशाय मंगलम् ॥ 5 ॥

गंगाधराय सोमाय नमो हरिहरात्मने ।
उग्राय त्रिपुरघ्नाय वामदेवाय मंगलम् ॥ 6 ॥

सद्योजाताय शर्वाय भव्य ज्ञानप्रदायिने ।
ईशानाय नमस्तुभ्यं पंचवक्राय मंगलम् ॥ 7 ॥

सदाशिव स्वरूपाय नमस्तत्पुरुषाय च ।
अघोराय च घोराय महादेवाय मंगलम् ॥ 8 ॥

महादेवस्य देवस्य यः पठेन्मंगलाष्टकम् ।
सर्वार्थ सिद्धि माप्नोति स सायुज्यं ततः परम् ॥ 9 ॥

## — अतिरिक्त —

मङ्गलाष्टकमेतद्वै शंभोर्यः कीर्तयेद्दिने ।
तस्य मृत्युभयं नास्ति रोगपीडाभयं तथा ॥ 10 ॥

≪ ·◦ ❈ ◦· ≫

# Shiv Mangalashtakam

bhavaay chandrachooday nirgunaay gunaatmane ll
kaalakaalaay rudraay neelagreevaay mangalam ll 1 ll

vrshaaroodhaay bheemaay vyaaghracharmaambaraay ch ll
pashoonaampataye tubhyam gaureekaantaay mangalam ll 2 ll

bhasmoddhoolitadehaay naagayagyopaveetine ll
rudraakshamaalaabhooshaay vyomakeshaay mangalam ll 3 ll

sooryachandraagninetraay namah kailaasavaasine ll
sachchidaanandaroopaay pramatheshaay mangalam ll 4 ll

mrtyunjyaay sambaay srshtisthityantakaarine ll
trayambakaay shaantaay trilokeshaay mangalam ll 5 ll

gangaadharaay somaay namo hariharaatmane ll
ugraay tripuraghnaay vaamadevaay mangalam ll 6 ll

sadyojaataay sarvaay bhavy gyaanapradaayine ll
eeshaanaay namastubhyam panchavakray mangalam ll 7 ll

sadaashiv svaroopaay namastatpurushaay ch ll
aghoraay ch ghoraay mahaadevaay mangalam ll 8 ll

mahaadevasy devasy yah pathenamangalaashtakam ll

sarvaarth siddhi maapanoti sa saayujyan tatah param ll 9 ll

— atirikt —

mangalaashtakametadvai shambhauryah keertayedyine ll
tasy mrtyubhayan naasti rogapeedaabhayan tatha ll 10 ll

✧˖°*❋ ❋*°˖✧